International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 20-27
© 2021 IJSR
www.anantaajournal.com
Received: 10-05-2021
Accepted: 12-06-2021

**कमलिनी पण्डा**
अद्यापिका, संस्कृतविभाग:, मेघासन् महाविद्यालय:, नुदडिहा मयूरभंजम्, ओडिशा, भारत

Corresponding Author:
**कमलिनी पण्डा**
अद्यापिका, संस्कृतविभाग:, मेघासन् महाविद्यालय:, नुदडिहा मयूरभंजम्, ओडिशा, भारत

# वत्सलरसे विश्वनाथ:

**कमलिनी पण्डा**

## प्रस्तावना

**साहित्यदर्पणानुसारम् विश्वनाथेन रसस्योपरि उक्तिं यत् –**

"विभावेनानुभावेन व्यक्त: संचारिणा तथा।
रसतामेति रत्यादि: स्थायीभाव: सचेतसाम्।।"
(साहित्यदर्पण:३/१)

रस: विभावाऽनुभावसंचारिभावसमूहाऽऽलम्बन ज्ञानस्वरूप:। तस्मात् कार्यस्वरूपो न। अर्थात् रस: विभावादिज्ञानजन्यो न। यदि रस: कार्य:, तर्हि विभावादिज्ञानं तस्य कारणं स्यात्। विभावादि ज्ञानानन्तरेण एव रस: उत्पद्यते; तस्मात् कारणात् रसप्रतीतिकाले विभावाऽनुभाव संचारिण: प्रतीतिविषया: न स्यु:। कथम्? यत: कारणज्ञानं कार्यज्ञानश्च युगपत् कदापि न सम्भवति। यथा- सुखकारणभूतं चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं च योगपद्येन न सम्भवति। कायिनियतपूर्व वर्त्तित्वं कारणत्वम्, प्रग्भाग प्रतियोगित्वं कार्यत्वमिति नियमेन कार्यकारणयो: एककालाऽवच्छेदेन प्रतीतिर्न भवति। रसस्तु एकमात्रं विभावादि समूह आलम्बनात्मक: संवेदनरूपो वर्त्तते । अत: विभावादिज्ञान् रसस्य कारणं न। ततोऽप्राप्यकारणन्तरस्य रसस्य न कार्यत्वमिति।

"नो नित्य: पूर्वसंवेदनोज्झित:।
असंवेदेनकाले हि न भावोऽप्यस्य विद्यते।।"
(साहित्यदर्पण:,३/२०)

अतो रस एकमनिर्वचनीयं तत्तम्, ब्रह्मास्वादसहोदरो वर्द्धते। अत: रसस्तु अलौकिक: स्वसंवेदनशीलो वर्त्तते। विश्वनाथेन विहितम्-'नापि भविष्यत्सात्दानन्दस्य स्वप्रकाशरूपत्वात् कार्यज्ञाप्य विलक्षणभावान्नो वर्त्तमानोऽपि

विभावादिपरामर्शविषयत्वात् सचेतसाम्। परमानन्दमयत्वेन सवेद्यत्वादपि स्फुटम् न निर्विकल्पकं ज्ञानं तस्य ग्रहकमिष्यते। तथा अभिलाषस्य सर्गयोग्यत्वविरहान्न च। सविकल्पसंवेद्य:।" "वाक्यं रसात्मकं काव्यम्" इति काव्यलक्षणघटकं वाक्यलक्षणमभिधायावसरसङ्गत्यां लक्षणघटकीभूतं रसस्वरूपं प्रतिपिपादयिष्यन्। विश्वनाथेन प्रतिपादितम् यत्-

"कारणानि च कार्याणि सहकारीणियानि च
रत्यादे: स्थायिनी लोके तानि चेन्नाटकाव्ययो:
विभावानुभावाश्च कथ्यन्ते व्यभिचारिण:।।"
(सा.द.पृ.६९)

रस: निर्विकल्पकज्ञानस्य विषयोऽपि न। 'प्रकारताविशेषता संसर्गता" इति त्रिविध विशेषतारहितं सम्बन्धाऽनवजाहिज्ञानं निर्विकल्पकं भवति। परं रसे विभावादय आनन्दमयत्वञ्च प्रकारतया भासन्ते, अत: स न निर्विकल्पज्ञानविषय:। अन्वेरुत्कम्-;

"विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभि:।
आनीय नीत: स्वाद्यत्वं स्थायीभावो रस: स्मृत:।।"
(सा.द.पृ.६९)

रस: सविकल्पकज्ञानस्य विषयोऽपि न व्यङ्ग्यत्वेन । शब्दसम्बन्ध योग्यताया अभावेन रसो न परोक्ष:। पुनश्च काव्यनिष्ठशब्दोत्पत्ति रसो न प्रत्यक्ष:। यथा-'साक्षात्कारतया न च परोक्षस्ततप्रकाशो नापरोक्ष: शब्दसम्भवात्।"

अत्यन्त: विश्वनाथानुसारं रसोऽनिर्वचनीय: सहृदय सामाजिकैर्ज्ञेय:। तत्र 'प्रमाणं चर्वणैवात्र साभिन्ने विदुषां मतम्" इति प्रमाणं वर्त्तते । अर्थात् तत्र काव्याभिधेयज्ञानात् रसाऽऽनन्दसमुद्भूत: आस्वादनं प्रमाणं वर्त्तते। अत्र शंका जायते-यदि रसोऽनिर्वचनीय:, न कार्‌य: तर्हि कथं "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति: "भवतीति भरतेन उक्तम्। तद् उच्यते विश्वनाथेन-

"प्रमाणं चर्वणोवात्र स्वाभिन्ने विदुषां मतम्।
निष्पत्या चर्वणस्यास्य निष्पत्तिरूपचारत:।"
(सा.द.-३/२६)

अर्थात् चर्वणा इति व्यापारस्य उत्पत्तिर्भवति तस्य उपचारेण रसेऽपि प्रयोगो भवति। अत: रसस्य विषये उत्पत्तिशब्द: गौण: वस्तुत: रस: न उत्पद्यते। वस्तुत: रसस्य बोध: व्यञ्जनाव्यापारेण भवति। कविराज विश्वनाथानुसार: रस: सहृदय आह्लादकारिणी वर्त्तते। पञ्चविभाव-अनुभाव- संचारिभावस्य सहयोगेन सामाजिक: साधारणीकाण प्रक्रिया अनुभवति।

विश्वनाथानुसारं रस: अष्ट विध:। यथा-

"श्रृङ्गारहास्यकरुणरौद्रवीरभयानका:।
वीभत्सोऽद्भुत इत्यष्टौ रसा: शान्तस्तथा मत:।।"
(सा.द.३/१८२)

**विषयसूची**

१.विश्वनाथस्य परिचय: २.रस: ३. तेषु वत्सल: ४.वत्सलस्य परिचय:
५. विभावा: अनुभावा: संचारीभावा: ६. अथ जगत्यां वत्सलस्य प्रभाव:
७. अति जगत्यां वत्सल: ८. उपसंहार:

**विश्वनाथकविराजपरिचय:**

अष्टादशभाषावारविलासिनीभुजङ्ग सान्धीविग्रहिक अलंकारगगनमार्तण्ड कविराजविश्वनाथ: कलिङ्गनरपते वंशानुक्रमेण मन्त्री परिवारे जात:। तस्यापि पितृपिता महादोय: काव्यालंकारशास्त्रेषु विचक्षणा: आसन्। स्वयं वहु काव्यनाटकानां लेखक: विश्वनाथ: सर्वप्रथमतया मुने: भरतस्य मतमवलम्ब्य परिपूर्णतया अलंकार ग्रन्थं साहित्यदपर्णम् निर्ममे। प्रगित: सर्वे ग्रन्थकारा: काव्यनाटकालंकारजगत: अंशमात्रंविविच्य ग्रन्थान् निर्मितवन्त:। साहित्यदर्पणे वाक्यवृत्ति-काव्यदर्शन विचरानन्तरं-नायकनायिका विचारं तथा नाटकालंकाराणां पात्राणां च विचारं कृत्वा दोषगुणरीतिअलंकारदीनां विश्लिष्ट परिचयेन सह दोष-परिच्छेदात्मकं साहित्यदर्पणाक्षं ग्रन्थं रचयामास ।

विश्वनाथाद् पूर्वं काव्यजगत: साहित्यनाम अन्यकेनापि न उट्टङ्कितम् । काव्यादर्श:- काव्यालंकारविवेक इत्यादि रुपेण सर्वे ग्रन्थनाम कृतवन्त: । प्रथमतया साहित्यदपर्णम् इति काव्यशास्त्रस्य नामान्तरम् साहित्यम् विश्वनाथेन एव प्रचारितम्।

सन्धौ सर्वस्वहरणं विग्रहे प्राणहरणम्।
आलावदीननृपतौ न सन्धिर्न च विग्रहः।।
(साहित्यदर्पणः ४/१३)

## २. रसः

रस आनन्दरूपः। ब्रह्मणः स्वरूपमपि आनन्द एव। यथोक्तं तैत्तिरीयोपनिषदि-रसो वै सा। रसं ह्येवायं लब्धनन्दी भवति काव्यानन्दो ब्रह्मानन्दसहोदरः। काव्यस्यात्मापि रस एव। अतो रसस्वरूपविवेचनं नितान्तं प्रयोजनम्। अस्य सूत्रस्य व्याख्यां ते ते आचार्याः स्व-स्वमतानुसारेणाकार्षुः। तस्यैव फलस्वरूपेण-उत्पत्तिवाद-अनुमितिवाद-मुक्तिवादा-भिव्यक्तिवादानाम् रसविषये विकासो बभूव। अस्य सूत्रस्य घटकीभूते द्वे एव पदे व्याकर्त्तव्ये वर्त्तते।

संयोगात् पदं निष्चत्तिपदञ्च। यद्यपिस्य सूत्रस्यानेके व्याकर्तारः सन्ति किन्तु तेषु चतुण्णाँ व्याकर्तृणां नामानि प्रख्यातानि सन्ति। ते सन्ति भट्टलोल्लट-श्रीशङ्कुक-भट्टनायक-अभिनवगुप्तपादाश्च। एतेषां चतुर्णामचार्याणां संग्रह च कार काव्यप्रकाशकारः काव्यप्रकाशस्य चतुर्थे उल्लासे। तेषु चतुर्षु आचार्येषु प्रचीनतमा व्याख्या भट्टलोल्लटस्य व्याख्या वर्त्तते। भट्टलोल्लटस्य मतानुसारेण सूत्रस्थस्य संयोगात् पदस्य त्रय आर्थाः सन्ति–उत्पाद्योत्पादकभाववरूपसम्बन्धत्, गम्यगमकभाववरूपसम्बधात्, गम्यगमकभाववरूपसम्बन्धाच्च। निष्पत्तिः पदस्यार्थः उत्पत्तिः वर्तते।

विभावैर्लीलनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभवैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्या रामादावनुकार्ये तद्रूपतानुसन्धनात् तर्त्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः। अस्य व्याख्यायाः तिस्रो विशेषताः सन्ति यथा-

1. अस्मिन् व्याख्याने स्थायिभावेन सह विभावादीनाम् उत्पाद्योत्पादकभाववरूपः सम्बन्ध्, अनुभावानां गम्यगमकभाववरूपः सम्बन्धः, व्यभिचारिणां च पोष्यपोषकभाववरूपश्च सम्बन्धे भवति।
2. अस्मिन् मते रसो मुख्यतयाऽनुकार्ये रामादौ उत्पद्यते। अनुकर्तृत्वात् गौणरूपेण नटेऽपि रसो भवति।
3. येन प्रकारेण संयोगात् पदस्यास्मिन् मते त्रय अर्थाः सम्भवन्ति, तेनैव प्रकारेण निष्पत्तिपदस्यापि त्रयः अर्था अत्र वेदितव्या, स्थायिभावेन सह विभावानां संयोगात् उत्पाद्यउत्पादकभाववरूपसम्बन्धत् रस निष्पत्तिः। अनुभावानां संयोगात् गम्यगमकभाववरूपसम्बन्धत् रसस्य निष्पत्तिः भवति। व्यभिचारिणां संयोगात् पोष्यपोषकभावसम्बन्धात् च रसस्य निष्पत्तिः पुष्टिर्भवति।

### उत्पत्तिवादः

श्रीभट्टलोल्लटः उत्पत्तिवादस्य संस्थापकः तेन मतानुसारेण रसः मुख्यतयाऽनुकार्ये उत्पद्यते, प्रतीयते पुष्यते च। गौणरूपेणाऽनुकर्तरि नटेऽप्येतत् सर्वं भवचि परन्तु सामाजिके रसानुभूतिः कस्मात् कारणाद् भवतीति समस्यायामस्यां व्याख्याख्यायामवधानं न कृतम्। अनुकार्याः रामादिकाः तु अतीते काले आसन्। साम्प्रतं तु ते नहि सन्तिः; अतएव वर्त्तमानकाले क्रियमाणेनाभिनयेन रामादिषु रसोत्पत्तिरसम्भाविनी। अतएव अनुकार्यानुकर्तृषु नटादिष्वपि रसोत्पत्तिर्नहि भवितुं शक्नोति।

### अनुमितिवादः

श्रीशङ्कुकः अनुमितिवादस्य प्रतिष्ठापकः। श्रीशङ्कुककृतां व्याख्यां काव्यप्रकाशकारेण प्रकाशितं यत्–राम एवायम् अयमेव राम इति, न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति, रामः स्याद् वा न वाऽयमिति, रामसदृशोऽयमिति च, सम्यक-मिथ्या-संशय-सादृश्य-प्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमितिप्रतिपत्त्या ग्राह्यः। यथा-

शेयं ममाङ्गेषु सुधारसच्छटा, सुपूरकर्पूरशलाकिकादृशोः।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता।।
दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च।
अविरलविलोलजलदः कालः समुपागतश्चायम्।।

इत्यादिकाव्यानुसन्धनबलाच्छिक्षाभ्यासनिर्वितस्वकार्यप्रकटनेन च नटे नैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्तिमैरपि तथानभिमन्यमानैः विभावादिशब्दव्यपदेश्यैः, संयोगात् गम्यगमकभाववरूपत्वात् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो इत्यादिर्भावः। पुनः 'चित्रतुरगन्यायस्य" कल्पनाविहिता। वालाश्चित्रस्थिते अवास्तविके अश्वे वास्तविककाष्ठवृद्धिं कुर्वन्तः क्रीडन्ति, तथैव दर्शका अभिनेतृषु रामादिवुद्धिमारोपयन्तः अभिनयकौशलवशात् रसानुभूतिं कुर्वन्ति। वस्तुतो

दर्शकैश्चित्रतुरगन्यायेन नटादिषु रामादिरूपत्वग्रहणात् रसप्रतीतिं अनुमाय स्ववासनया रसानुभूतिः क्रियते।

**भुक्तिवादः**

भट्टनायकः भुक्तिवादस्य प्रस्तावकः। तस्यानुसारं 'भोज्यभोजकभावात् "इति भवति संयोगात् इत्यस्यार्थः। निष्पत्तिरित्यस्य च भुक्तिः इत्यर्थः। तन्मते रसप्रक्रियायां प्रथमं अभिधाव्यापारेण शद्बार्थोऽवगम्यते। ततो भावकत्वव्यापारेण विभावादीनां साधारणीकरणं जायते, अर्थात् विभावादयो व्यक्तिविशेषस्यैव न सन्तः जनसाधारणस्य सहृदयमात्रस्य वा भवन्ति। तदनन्तरं भोजकत्वव्यापारेण हृदये सत्वोद्रेकाद् रसो भुज्यते सहृदयैः।

भट्टनायकेन आविष्कृता साधारणीकरणप्रक्रिया सततं मनोवैज्ञानिकी सर्वमान्या च। तन्मतं सांख्यसिद्धान्तमनुसरति। यथा सांख्ये सुखदुःखादयोऽन्तकरणस्यैव धर्माः, न पुरुषस्य। किन्तु अन्तकरणसम्बन्धत् पुरुषेऽपि सुखादीनां औपाधिकी प्रतीर्जायते। तथैव भट्टनायकानुसारं दर्शकेषु अविद्यमानोऽपि रसः औपाधिकरूपेण तैः भुज्यते।

रस्यते अथवा रसयति इति रस: । अर्थात् स्वयं सहृदयहृदयेन आस्वाद्यते पुनश्च आस्वाद्यमान: स हृदयान् रसयति येन ते रसनिमग्ना: विशेष्य सकलमपि विषयं विस्मरन्ति । स्वयं रस: विभाव-अनुभाव-संचारीभावै: द्योतमान: आस्वाद्यतां भजते। अर्थात् लतान्तराले दरविगलितवसनां निमलितलोचनां कांचित् कश्चन दूरात् प्रच्छन्न: अवलोकयति । एषा नायिकाऽपि तं जानन्ती अपि अजानाना इव अभिनयति । एतयो: अन्तरे पूर्वरागोत्तीना रति: चकास्ते । श्रोता वा दर्शक वा सर्वं समनुभूय रसमास्वादयति । एवं च मृतपुत्रशवं स्कन्धे कृत्वा मुकुलित केशपासा शैव्या स्मशानभूमि जाति सहृदयानां नयनेभ्य अश्रधारा विगलति । अर्थात् शोक: भावुकानां हृदयकोमलं मश्नाति । एवमपि अपराधिनं प्रत्यक्षत: दृष्ट्वा वीर: तं हन्तुमुद्यतऽपि तस्मै शास्त्रं ददाति। युद्धाय आह्वयति नि:शस्त्रं तं न निहन्ति । एषा हि वीरता एवं एवं उदीप्त: स्थायिभाव: सहृदयहृदये रसतां भजते । एष रस: प्रधानतया श्रृङ्गार-वीर-करुणात्भुत:-हास्य-भयानक-विभत्स: -रौद्रै-अष्टधा भवन्। पुन: शमस्थायी भाव त्वया शान्तं नवमरसं अङ्गीकरोति । अथ एभ्य: स्वतन्त्र: वत्सल: दशमरसत्वेन विश्वनाथेन विवृत।

**३. तेषु वत्सल:**

रसे सारश्चमत्कार: सर्वत्राऽप्यनुभूयते ।
तच्चमत्कारसारत्वात् सर्वत्राऽप्यद्भुतो रस:।
तस्माद्द्भुतमेवाह कृती नारायणो रसम् ।।
(ध्वन्यालोक: लोचनडीका: २/पृ१९०)

अस्य सार: संपूर्ण रसविषय श्रवणानन्तरं पढनानन्तरं वा अन्तरे कापि अपूर्वा अनुभूति: भवति । सेयं अनुभूति: चमत्कारशब्देन आलंकारिकै: उदाह्रियते । यथा नागानन्दे –

शिरामुखै: स्वन्दते एव रक्तं
अद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवार्प्यहयं
किं भक्षणात् तं विरतो गरुत्मन्!
(नागानन्दे - पृ/२२३)

अत्र दयावीरस्य जीमूतवाहनस्य गम्भीरं वचनं श्रुत्वा वा पढित्वा वा सहृदयस्य सर्वाङ्गे रोमाञ्च: स्फुरति । रसस्य एता स्वतन्त्रता भवति साधारणी कृति: ।

परस्य न परस्येति ममेति न ममेति च ।
तदास्वादे विभावादे: परिच्छेदो न विद्यते ।।
(सा.द.३/१२)

अस्यार्थ भवति यदा मञ्चे नायक: नायिकामालिङ्गति द्रष्टा सहृदय: स्वयंमालिङ्गति इति आत्मानं मनुते । किन्तु एतेषां समक्षे आलिङ्गनजा लज्ज्या न भवति । अर्थात् ममेति न ममेति च इति रूपेण स सहृदय: आलिङ्गनं अनुभवति । तथैव जिमूतवाहन यदा आत्मानं गरुत्मते उत्सृजति सहृदय: अपि स्वं शरीरं उत्सृजति इति भावयति । अहो वैचित्रियं रससंसारस्य! ।

**वत्सलस्य लक्षणं**

वस्तलश्च रस इति तेन स दशम मत:।
स्फुटं चमत्कारितया वत्सलं च रसं विदु: ।
स्थायी वत्सलतास्नेह: पुत्राद्यालम्बनं मतम् ।
उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादय स्तथा ।।
(सा.द.३/२५१)

अर्थात् वत्सलं सर्वे: आलङ्कारिका: न स्वीकुर्वन्ति । किन्तु प्राचीनै भरतादिभि: स्वीक्रियते । इति विदु: इति वहुवचनेन कविराज: सूचयति । तत्र कारणं च वक्ति स्फुटं चमत्कारितया। स्फुटं इति प्रत्यक्षतया, चमत्कारितया + चमत्कारिता प्रदानेन वत्सल: रसत्वेन प्रथित: भवति । अर्थात् माता वानरी तरुशाखायां स्वं सन्तानं खेलयन्ती यदा मोदते नीचैस्थित: दर्शकोऽपि तदालोक्य कृतकृत्यो भवति । इति एषा चमत्कारिता तथा स्व वत्सं लेहमानां धेनु पश्यतो दर्शकस्यापि मानसे वत्सलता विगलति । इति एवं सर्वेषु क्षेत्रेषु प्रविलोक्यते । अरण्येऽपि वाघ्रद्वोय: मृगशिशुं लालयन्ति इति कचित् दृश्यन्ते । खाद्यखाद्यकयो: वैरं विस्मारयन् वात्सल्यं विजयते । अथ एष शिशुमर्कट यदा शाखायां शनै: शनै: चलति तं प्रेक्ष्‍यमाना जननी रोमाञ्चिता सती मोदते। तदेव लिखति स्थायी वत्सलता स्नेह:। य: मातापित्रो: सहृदयस्य वा हृदये राजत्वं करोति शिशव: अर्थात् सन्तानाद्वोय: आलम्बनानि भवन्ति। तेषां व्यवहार: मधुमन्दभाषा उद्दीपनानि भवन्ति। तथा च –

अमृतं वाल भाषितं ......। "अन्तिमाङ्के अभिज्ञानशाकुन्तले कालिदास लिखति:-
आलक्ष्य दन्तमुकुलान्य निमितहासम्
अव्यक्तवर्ण रमणीय वच: प्रवृत्तीन् ।
अङ्काश्रय प्रणयिन: प्रणयान् वहनो:
ध्वन्या स्तदङ्ग रजसा मलिनी भवन्ति ।।
(अभिज्ञानशाकुन्तलम् ७/१७)

अस्यार्थ: भवति शिशु यदा हसति तत्र कारणं किमपि नास्ति । वयं किमपि असङ्गतं प्रेक्ष्य हसाम:। किन्तु शिशो: हासे किमपि कारणं नास्ति । स यां विरं वक्ति तत्र सर्वे वर्णा: विशेषत: मूर्धन्या: न स्फुरन्ति । अतएव एषां भाषा अवोध्या अपि रमणीया। प्रायश: वाला: अङ्कात् अङ्कं लम्फते । तथा उत्सङ्गे नितरां मोदन्ते । एवं भूतान् पुत्रान् पौत्रान् वा ये स्वाङ्के वहन्ति वालास्तु तेषामुत्सङ्गे मलमुत्राणि तेजन्ति । तद् अपि वत्सलता विभूता गुरव: स्नेहेन घृह्विन्त न विरक्ता दु:खिता वा भवन्ति । एवं मलेन मलिना: गुरुजना ध्वन्या इति कविगुरु कालिदास वदति। प्रकारान्तरेण कालिदास प्रथयति य: शिशुनां मलमुत्रेण न पवित्र: नासौ पिता वा माता वा पतिामहो वा मातामहो वा पितामही मातामही वा । अस्यार्थ भवति स्पष्टतया शिशो: दन्ता न दृश्यन्ते । यत्नेन लक्षीकरणेन कथं चित् दन्ता: अनुमियन्ते । अत्र सामाजिकवन्धनस्य मौलिकतां कवि: स्व वर्णनाचातुरीद्वारा द्रढयति । एवं च विभावा:- अनुभावाश्च अत्र वर्णिता ।

विभावा: अनुभावा:संचारीभावा:
आलिंगनांगसंस्पर्श शिरश्चुम्बनमीक्षण्म् ।
पुलकानन्दवाष्पाद्या: अनुभावा: प्रकीर्तिता: ।।
(सा.द.३/२५३)

अर्थात् कोमलं वालम् आलोक्य दर्शकस्य गुरुजनस्य वा आलिङ्गितुम् इच्छा भवति । आर्मषण ाय च हस्तं प्रसरति । अस्य अर्भकस्य गुरुजना: शीरश्चुम्बन्ति । कोमल मधुर वीक्षणेन तं आलोकयन्ति । शरीरे च तेषां रोमहर्षणम् प्रजायते । एतत् सर्वं अनुभावरूपेण सहृदयानां अनुभवं गोचरं भवति ।

संचारिणोऽनिष्टशंकाहर्षगर्वादयो मता: ।
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातर: ।।
(सा.द.३/२५४)

अनुभावानन्तरं संचारीभावान् निर्दिशति अनिष्टशंका इति । स्नेहिन: गुरुजना: विशेषत: माता स पुत्रस्य कन्याया वा अनवरतं सर्वश: अनिष्टशंका करोति । दरचलन्तं एनं तत् पश्चात् अनवरतं अनु जाति । पतनशंका तां वाधते । शिशो: वदने श्याम कजलविन्दु किमपि अन्यस्य दृष्टिपातभिया भिदधाति । काश्चन च कृष्णवर्णं सूत्रं पादे वा करे वा शिशो: वध्नन्ति । कचित् अपि वर्हिगमनात् परं पत्यावृत्य मान्त्रिकान् आहूय मन्त्रजलै: स्वं सन्तानं अभिछिञ्चन्ति । तथा स्व सन्तानस्य

सौन्दर्येण चलनेन च गर्विता: भवन्ति । आनंदिताश्च प्रतिवेशिनां पुरत: सन्तानं गुणान् जल्पन्ति । एवं संचारिभावा: अस्य रसस्य समुपजायन्ते।

**अथ जगत्यां वत्सलस्य प्रभाव:**

अथ जगत्यां वत्सलताया: प्रभावं समीक्षामहे । रामायणे महावीरो दशवदन इन्द्रजितो गौरवेण आत्मानं बलवन्तं मनुते रस । तथैव हनुमतो विक्रमेण तत् पिता केशरी आत्मानं अपि सौभाग्यवन्तं विचारयति स्म। एषां हृदये या स्फीतता सा केवलं वत्सलता एव । इदानीं अपि अस्मद् देशे पुत्राणां विभूत्या पितरो मातरो वा स्थविरा आत्मानं गौरवान्वित्यं भावयन्ति । पञ्चाशत् वर्षीयं पुत्रम् अपि आलिङ्ग्य सुखिनो भवन्ति। एवं कवीनां सेविकानां तथा विविधै: गुणै: भूषितानां सन्तानानां गौरवेण पितरो मातरो पितामहाद्याश्च परिचिता: भवन्ति। तेषां हृदये केवलं वात्सल्यमेव लहरीयते । अत्र वयसीमानं वात्सल्यं उत्क्रामति जगत्यां प्राचीनयुगात् आरभ्य अद्य यावत् एषा वत्सलता संपूर्णं समाजं स्नेहेन बध्नाति । तथा हि यदुकुल नलिनदिनेश .......।" इति पदं जयदेवेन गीतगोविन्दे व्यवहृतम् । यद्यपि भगवान् श्रीकृष्ण: वसुदेवस्य पुत्र: वसुदेवात् वह: कालात् प्राक् यदु अस्य वंशस्य प्रथम: पिता आसीत् । किन्तु श्रीकृष्ण: विभुति प्रचनेन यदु: महिमान्वित: अभवत् । तेन कवय: यदुनन्दनं रघुनन्दने एति शब्दै: श्रीकृष्ण श्रीरामं च उदाहरन्ति स्म । तदेव विश्वनाथ: संचारीभावे कथयति -: शौर्याद्वोय: इति।

अथ सार: वत्सलता एका अपूर्वा तथा विस्तृता प्रीति भवति । यया ग्रामेषु ग्रामवासीन: निजग्रामस्य योग्येषु वात्सल्येन अधिकं स्निहन्ति । एवं अपि उत्कलीया: अस्मद्देशीय इति सामन्तचन्द्रशेखरं-मधुसुदनं-श्रीराम चन्द्रभंज गोपवन्धुमपि कीर्त्त इत्या आत्मानं गर्वितं अनुभवन्ति । गुणेन विविधेन प्रभाववत: जनान् सर्वे नागरीका यया प्रवृत्तीया आत्मीयं भावयन्ति सा प्रवृत्ति: वस्तुत: गुणवात्सल्यं भवति । तथा च सन्त तुलसी दास गुणवात्सल्योपरि कथयति

कबहूँ ससि माँगत आरि करैं
कबहूँ प्रतिबिम्ब निहारि डरैं ।
कबहूँ करताल बजाइ के नाचत
मातु सबै मन मोद भरैं ।
कबहूँ रिसिआइ कहैं हठिकै
पुनि लेत वही जेहि लागि अरैं ।
अवधेस के बालक चारि सदा
तुलसी मन मंदिर में बिहरैं ।

अत्र य: वालक: रघु: आलम्बन विभाव:, अस्य पुर्नवारं उक्तिं एवं अङ्गुल्येन सह गच्छन् प्रमाणं अस्ति य: नम्र:। अस्मिन् श्लोके सूर्यवंशी राज्ञा रघुनां वाल्यावस्थायां वर्णयति। अत्र महाराज्ञा दिल्लीपस्य नयनानां सन्दर्यं अनुभाव: एवं तस्य हास: संचारिभाव । अत्र वात्सल्य रस: पूर्णरूपेण स्पष्ट: अभिव्यनक्ति ।

**अति जगत्यां वत्सलस्य प्रभाव:**

अथ अति जगत्यां वत्सलरसस्य प्रभावं वर्णयाम: । जगती + संसार: । अति जगती जगत्या: उपरि जगती पते: प्रजाभि: सह य: सम्बन्ध: तमेव अवलम्ब्य विचारणा प्रर्वतिष्यते । सन्त: साधका: परमेशं भक्तवत्सल: इति वदन्ति । अर्थात् भक्त: भगवतो य: सम्बन्ध: स केवलं वत्सलरस एव । भक्ता: पित्र: समीपे पुत्र इव परमेश्वरस्य समुखे आत्मानं दु:खं निवेदयन्ति। तेषां निवेदनप्रकारं सम्यक् अनुभूय: भगवान् वाञ्छाकल्पद्रुम: अर्न्तयामी तेषां अन्तरं विविश्य सर्वं किंचित् दु:खम् अपहरन् तत्र सुखं सन् दधाति । अत्र भक्तस्य निवेदनप्रकारं स अपेक्षते । तथा च अब्दुल् रहिम् .

रत्नाकरस्तवगृहं गृहिणि च पद्म
किं देयमस्ति भवते जगदिश्वराय ।
आभिरवामनयना ऋतमानसाय
दत्तं मनोयदुपते तदिदं गृहाण ।।
(कल्याणपत्रिका प्रवन्धात्)

अस्यार्थ: हे भगवन्! भवते किञ्चित् दात्तुं मनमे बलते । किन्तु दानस्य एष नियम: भवति यत्-यस्य यत् नास्ति तस्मै तत् देयं ।" अन्यथा सागरे मेघस्य वारि वर्षणमिव निरर्थकं स्यात् दानम् । भवते किञ्चित् रत्नं दातुं कामयामि स्म । किन्तु; रत्नाकरस्तवगृहं । तवगृहे रत्नानां पर्याप्तता भवति । तत: अस्मात् कामात् निर्वत्ते। धान्यमुंदीनि शस्यानि अपि दातुं न शक्नोमि । यत: सर्वेषां शस्यानां अधिश्वरी भगवति कमलिनी भवत: गृहलक्ष्मी: भवति । अत: तामाशां जहामि । ग्रामादिकं अथवा कांचित्

क्षेत्रभूमिम् अपि दातुं न पारयामि । यत: भवान् जगदीश्वर: विश्वसम्रट । सर्वं विचिन्त्यं विचिन्त्यं मया विचारितं आभिरवामनयना हृतमानसाय।" पुरा यमुनानिकुञ्जे ब्रजवामलोचना भवत: मन: अपहृतवत्य: । अर्थात् इदानीं भवान् अमना: तिष्ठति । भवत: मन: नास्ति । अत: हे यदुपते मम इदं मन: भवते अर्पयामि । स्नेहेन एतं उपहारं गृहाण । इति मेवं हृदयार्पणेन भगवतो अन्तरे भक्तं प्रति वत्सलता समुदेति । तथा च देत्यपराधमार्जन स्तोत्रे –

विधेरज्ञान्येन द्रविणविरहेणा रसतया
विधेया शक्यत्वात् तव चरणयो या च्यितिरभुत् ।
तद् एतत् क्षन्तव्यं जननिसकलधारिणि शिवे
कुपुत्र जायते ववचित् अपि कुमाता न भवति ।।
(देत्यपराधमार्जनस्तोत्र:)

अर्थात् भक्त: मातरं प्रार्थयति हे जननि! पूजाविधीन् न जानामि । तथा विविध उपचाराणां क्रयमाण मम धनाभाव: भवति । तथा कर्त्तुमपि आलस्य जायते । अत: उपयुक्तं कर्म न कृत्वा तव चरणकमले अपराधी अस्मि । हे सकलधारिणि शिवे एतान् सर्वान् मम अपराधान् क्षमस्व । अहं तव ववचित् कुपुत्र: अस्ति । संसारे कुपुत्रा: वहव: भवन्ति । किन्तु ववचित् एकाऽपि कुमाता न भवति । अत: तं अवश्यं मां क्षमसे इति अहं भावयामि । इति अत्र सन्तानानां यथा संसारे अधिकार: दृश्यते तथा भवान्यां भक्तस्य अधिकार: भवान्या: वत्सलतामनुभूय प्रकटित: । पुनश्च तथा च ब्रह्मस्तुतौ -

नीचोऽपि पापगलितोऽपि विनिन्दितोऽपि
भ्रूयात् तवाह: मिति यस्तु किलएकवारं ।
तं यच्छसी इश निजलोक इति ब्रतं ते
तस्मात् त्वमेवशरणं मम दिनबन्धो! ।।
(दिनवन्धुअष्टकम्)

इति अत्र अपि भक्त: भगवति निजं अधिकारं प्रथयति । एवं वात्सल्यं भक्तभगवतो व्यवहारे भक्तकविभि: बहुधा वर्णितम् । तथा च भागवते दुर्वासाम्बरीषचरिते अम्बरीषं प्रति सन्तुष्ट: महर्षि: दुर्वासा: तस्मै दशजन्म यावत् चक्रवर्त्ती त्वरूपं आर्शीवादं दत्त्वा गतवान् । आर्शीवादं श्रृत्वा अम्बरीष: मूर्च्छामागत: । भक्तवत्सलो भगवान् तमुथाप्य मृर्च्छा कारणं अपृच्छत् । अम्बरीष: जगाद एकस्य जम्रनो दु:खं यथा जन्तो प्रदद्यते ।" इति उत्त्वा राजा अम्बरीष: मूर्च्छामवाप । ततो भगवान् तमामृष्य जगाद

गच्छग्च्छाद्य वैकुण्ठं सुखं तिष्ठं ममातिङ्के
दशधावतरिष्यामि तत् कृते क्षितिमण्डले ।।
(भागवते:)

यथा विपन्न: शिशु मार्तु: वसनाञ्चले वदनं सांगोप्य क्रन्दन अभियुक्ते माता च तमातृष्य आपद: समुद्धरति तथैव विश्वमातृहृदय भगवान् वात्सल्येन अम्बरीष: आमृष्य वदति वत्स: त्वं दुर्वासस: वचनेन विव्रतो न भव। अहं अस्मि शततं तव पाश्वे । त्वं अस्मिन् एव मुहूर्त्ते वैकुण्ठं गच्छ । तव कृते अहं दशावतारां गृहीत्वा मत्र्ते जन्मग्रहणं करिष्यामि । तथा जन्ममृत्युजनितं दु:खमपि अनुभविष्यामि ।
यथा माता पुत्रस्य दु:खं स्वयमुपरि नयति तथैव भक्तवत्सल: भगवान् अम्बरीषस्य दु:खम् स्वयं गृण्हान: तं स्वपार्श्वे वैकुण्ठे न्यवेशयत् । कस्याऽपि मातु: अपेक्षया भगवतो स्नेहधारा नितरां वलीयसी । वात्सलस्य अति जगत्यां पुरासणेषु विविधा: कथा: परिपूर्णा: । लेखा गौरवभयात् नाधिकोदाहरणानि दीयन्ते।

**उपसंहार:**

प्राचीना: आलङ्कारिका: वत्सलं रसं शिशुत्वे सिमितं अरक्षन् । कविराज: विश्वनाथ: शौर्य्याद्योयस्तथा इति पदं संचारीभाव प्रकरणे लिखितवान् । तेन युवसु अपि सन्तानेषु प्रवय सां स्नेह वात्सल्यं भजते । तथा च भक्तवत्सलस्य अपारं वात्सल्यं स्व भक्तेषु विपर्णेषु संपर्णेषु वा लहरीव प्रसरति । इति भक्तिरसाभिभूता: जना: सम्यक् अनुभूय: विमोहिता भवन्ति । तथा भक्तिमार्गे साधनक्षेत्रे प्रागित: केवलं आत्मनिवेदनम् आसीत्। भगवतो वात्सल्यमाप्नुवन्त: भक्त: भगवती स्वाधिकारमपि प्रथयन्ति इति स्वतन्त्रमार्ग: मन्ये कविराज: विश्वनाथेन एव समुद्घाटित:। वत्सलस्य संकीर्णक्षेत्रं प्रसार्य विशालं क्षेत्रम् कविराज: प्रस्तुतवान् इति वत्सलरस विश्लेषणे तस्य स्वतन्त्रम् विशिष्टं स्थानम् ।

## सहायकग्रन्थसूची


1. देव्यपराधमार्जनस्तोत्र: / सरस्वती ब्रह्मानन्द/गीताप्रेस् / कल्याणS।
2. ध्वन्यालोक:/लोचनटीका/अभिनवगुप्त/द्विवेद्वी शिवप्रसाद/चौखम्बा/वाराणसि/प्रथमसंस्करणम्/
3. २०११।
4. गीतगोविन्द/जयदेव/साहु विद्याधर/धर्मग्रन्थ ष्टोर/कटक/प्रथम संस्करणम्/ २०१७।
5. साहित्यदर्पण:/विश्वनाथ कविराज:/शास्त्री कृष्णमोहन/चौखम्बा/वाराणसि/ नूतनसंस्करणम्/२०१५ ।
6. रामचरितमानस/तुलसिदास/चौखम्बा/नूतनसंस्करणम्/२०१० ।
7. काव्यशास्त्रस्य इतिहास:/मिश्र जगदीश/नूतनसंस्करणम् ।